National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2023; 1(51): 221-225
© 2023 NJHSR
www.sanskritarticle.com

**डा. के. तारकरामकुमार शर्मा**
आचार्यः,
श्री वेङ्कटेश्वर वेदविश्वविद्यालयः,
तिरुपति

**Correspondence:**
**डा. के. तारकरामकुमार शर्मा**
आचार्यः,
श्री वेङ्कटेश्वर वेदविश्वविद्यालयः,
तिरुपति

# सङ्गीतशिल्पादि विज्ञानानां शुक्लयजुर्वेदीय-मूलानि - एकं परिशीलनम्

**डा. के. तारकरामकुमार शर्मा**

**लेखसंक्षेपः-**

शुक्लयजुर्वेदसम्बद्धमन्त्रेषुपरिशील्यमानेषु बहूनां विज्ञानानां मूलानि परिदृश्यन्ते। तत्र कला सम्बद्धानां शिल्प सङ्गीतादि विषयाणां च मूलानि समुपलभ्यन्ते। अतः लघुशोध प्रबन्धेऽस्मिन् सङ्गीता-दिविषयमूलानां समीक्षणं कृत्वा चिकित्सा, कृषि, पशुपालन, यन्त्र, अस्त्र विषयानां विज्ञानानां मूलभूतानि वैदिकवाक्यानि उद्धृत्य शोधलेखोऽयं सज्जितः ।

**कुञ्चिका पदानि-**

१. हिरण्यगर्भः, २. कला, ३. धनुर्विद्या, ४. सङ्गीतकला, ५. नृत्यकला, ६.कवित्वम्, ७.शाला, ८. शिक्षा, ९. शासनम्, १०. चिकित्सा, ११. आहारः, १२. कृषिः, १३. खनिजद्रव्यम्, १४.ओषधिः, १५. यन्त्रम्. १६. अस्त्रम्. १७. पशुपालनम्, १८. संस्कृतिः ।

सृष्टिकारणरूपा कला त्रिविधा यस्याः प्रतीकरूपेण सन्ति-सत्यं शिवं सुन्दरम्। अत एव भारतीयसंस्कृतौ कलायाः अस्तित्वं सत्यमनादिश्च मन्यते । सृष्टेः आदौ ईश्वरस्य अस्तित्वं सर्वे धर्माः स्वीकुर्वन्ति स्म । वेदेषु सः पुरुषस्य हिरण्यगर्भस्य च सञ्ज्ञया निर्दिष्टः । ऋवेदस्य मन्त्रमिदं द्रष्टव्यम् -

**"हिरण्यगर्भः समवर्तताग्रे......................"**[१]

एतस्मात् हिरण्यगर्भात् विराट्पुरुषात् वा अनेकाः कलाः उत्पन्नाः जाताः। "चन्द्रमा मनसो जात"[२] इत्यादयः। प्राकृतिका सम्पात्तिरपि ईश्वरस्यैव इति मन्यन्ते। यथा - यज्ञपुरुषात् पर्जन्यः पर्जन्याच्च अन्नादीनामुत्पत्तिरिति कथ्यते ।

बृहदारण्यकोपनिषदि कथितमस्ति यत् कलाकारस्य (अमूर्तब्रह्मणः) दर्शनं तस्य कृतिना (मूर्तसृष्ट्या) भवति[३]। यथा - उपर्युक्तविवरणात् सर्वप्रथमं कलायाः उद्गमस्थानं ज्ञायते। (सृष्टौ विद्यमानाः अनेकाः कलाः (यस्याः स्वरूपमद्यापि लभ्यते एतदतिरिक्तश्चान्याः कलाः) वैदिकवाङ्मये वर्णितास्मन्ति । यथा - धनुर्विद्या, सङ्गीतकला, नृत्यकला कवित्वप्रदर्शनादयः। तैः सहैव ललितकला अपि मनोरञ्जनस्य साधनानि आसन् । कौषीतकीब्राह्मणे नृत्यगीतवादनानां सामूहिकं नाम शिल्पम् इति आसीत् । नैतावत्पर्यन्तमपितु ऋषिगणा अपि अवकाशसमये कलाकृतेः निर्माणं कुर्वन्तिस्म। ऋवेदानुसारेण भृगुमहर्षे वंशजाः काष्टकलायाः विशेषज्ञाः आसन्[४]। भित्तिचित्रं द्वारदेव्या रचना अलङ्करणादीनामुल्लेखः वेदेषु प्राप्यते[५]।

प्रस्तुते मन्त्रेऽग्निदेवस्य चित्रस्य स्पष्टोल्लेखः प्राप्यते, यज्ञशालानां द्वारेषु, हिरण्यमयीनां देवीनां रचनाविधानं भवति स्म। एतासां रचनानां महर्षिः पाणिनिः प्रतिकृतेः सञ्ज्ञां दत्तवान्। यासां सम्प्रति व्यवहारे उवकंसे इति कथ्यते। एतासु द्वारदेवीषु रात्रिं उषसइट्ठच देव्यौ प्रधानरूपेण दृश्येते । एतासां देवीनां अलङ्करणस्य चचर्चा ऋवेदे उषस्सूक्ते रात्रिसूक्ते च प्राप्यते। एकोदाहरणं प्रस्तुतमस्ति (उषस्सूक्तम्) वैदिकवाङ्मये कलायाः भव्यनिरूपणं रामायणे महाभारते च वर्णितमस्ति।

बालकाण्डस्य षष्ठसर्गे अयोध्यायाः नगर्याः वर्णनसमये तात्कालिक्याः शिल्पकलायाः भवननिर्माणकलायाः एवमादीनां अनुपमचित्रणं प्राप्तं भवति, एतदतिरिक्तं सौन्दर्यप्रसादनम्, अङ्गरागः, केशसज्जा, राजप्रासादः, रथाः, नगराणि, उद्यानानि, एतेषां कलापूर्णरचनायाः वर्णनाद् वैदिकसमाजस्य कलानुरागितायाः बोधो जायते ।

रामायणे वर्णितस्य अश्वमेधयज्ञस्य अवसरे भगवत्याः सीतायाः स्वर्णमयीप्रतिमायाः निर्माणं तात्कालिक्याः उत्तमशिल्पकलायाः परिचायकमस्ति । वाल्मीकिः लिखति रामायणे[६]।

सङ्गीतकलायाः यत्र चर्चा भवति तत्र सम्पूर्णसामवेदः उपस्थितो भवति। सामवेदस्य ऋचां पाठस्य गायनात् समवायसम्बन्धो वर्तते। एतेन देवताः सङ्गीतज्ञाः इति ज्ञायते। उदाहरणार्थं - प्रत्येकानां राज्यसभानां वर्णनं कुर्वन् वैदिकवाङ्मये स्थाने - स्थाने सङ्गीतस्य नृत्यकलायाश्च विशदं चित्रणं प्राप्यते । उर्वशी, मेनका इत्यादयः देवतानां सभायाः प्रमुखाः सर्वकलाप्रवीणाश्च नृत्याङ्गनाः दृश्यन्ते। उदाहरणार्थं वैदिकवाङ्क्षये निहितप्रमाणैर्विदितो भवति यद् वैदिकसमाजः कलाप्रेमी आसीत् । वैदिकवाङ्मये कलां मनोरञ्जनस्य साधनं न मत्वा आराधनायाः तपस्यायाः वा रूपं प्रदत्तमासीत्। एवञ्च कलानैपुण्यं तस्याः तपस्यायाः फलम् ।

वैदिकवाङ्मे वर्णितानां कलासूचीनामन्तर्गतेत्त्वेन वास्तुकलायाः अप्युल्लेखोऽभूत। गृहभवनादीनां निर्माणस्योचितस्थितिः, कक्षाणाम्, गवाक्षाणाम, उट्टालिकानां निर्माणोचितदिशायाः निर्देशोऽस्ति। स्ववस्थितगृहनिर्माणं न केवलम् इष्टिकापाषाणादीनां संयोगरूपमपितु सुखसमृद्धिस्वास्थ्यपवित्रतादीनां सङ्गमस्थानमस्ति। यथा वेदस्यैतन्मन्त्रे कथितोऽस्ति ।

**ऊर्जस्वती पयस्वती पृथिव्यां निमिता मिता।**
**विश्वान्नं बिभ्रती शाले मा हिसीः प्रतिगृह्णतः।।**[७]

अर्थात् यस्याः शालायाः यस्य गृहस्य निर्माणं भवेत् तत् -

१. ऊर्जस्वती - बलारोग्ये पराक्रमे च वृद्धिं प्राप्नोतु।

२. दयस्वती - अर्थात् यत्र पेयं जलदुग्धदधिघृतादीनां नानारसादीनां व्यवस्था भवेत्।

३. पृथिव्यां निर्मिता मिता अर्थात यस्य सुन्दरतां कलां दृष्ट्वा गृहपतेः प्रशंसा भवेत्।

४. विश्वान्नं विभ्रती - तगृहे खाद्यान्नपदार्थाः ऐश्वर्यञ्च भवेयुः ।

५. प्रतिगृह्णतः मा हिंसीः - तत्र निवासिनां कण्टादयः न प्रभावमुत्पादयेयुः ।

आधुनिकसमये गृहस्य मानचित्रं स्वीकृतं कारयन्ति। यतः तत्र निवासिनामनुकूलानां नियमानाञ्चान्तर्भाव्य एव गृहनिर्माणां भवत्विति । एतत्प्रकारमेव वेदे निर्देशः प्राप्यते यथा -

**ब्राह्मणा शालां निमितां कविभिर्निमिता मिताम्।**
**इन्द्राग्नी रक्षतां शालाममृततौ सौम्यं सदः।।**[८]

अर्थात् वेदज्ञानां विदुषामभिरुचेः सर्वेषु ऋतुषु सुखदाः शाला निर्मातु, एतत्ध्यातव्यम्। उत्तमैः विद्वद्भिः शिल्पकारैः प्रमाणयुक्ता शाला स्यात् । वायोः अग्नेश्च सहयोगेन प्रतिकूलतापसरति। (अत एव वायोः अग्नेश्च स्थानं स्मृत्वैव शालायाः निर्माणं भवतु ) । एताभिः सर्वाभिः सुविधाभिः पूर्णमैश्वर्यदं सुखदञ्च निवासाय गृहमेव ग्राह्यम् ।

हविर्धानमग्निशालां पत्नीनां सदनं सदः ।
सदो देवानामसि देवि शाले ।।[९]

अथर्ववेदस्यास्मिन् मन्त्रे गृहाभ्यन्तरस्य रचनायाः प्रारूपं वर्णितमस्ति। गृहे होमस्थानम्, स्त्रीणां निवासाय पृथक् स्थानम्, विदुषां च निवासस्थानम्, मेलनस्थानम्, ध्यानादिस्थानञ्च पृथक् भवेत्। एतादृक् शाला सुखदमुपयाति। वेदेषु स्थापत्यकलायाः स्वरूपस्य सङ्क्षिप्तोल्लेखः प्राप्यते ।

नमो भुवन्तये वारिवस्कृताय इति मन्त्रे नूतनभूमिं वासयोग्यं निर्मातुं स्तुतिरस्ति। नमस्तभ्य इति मन्त्रे शिलपिनश्च रथनिर्मात्रे रथकारेभ्यश्च वो नमः एवञ्च अयस्काराय कमरेभ्यश्चवो नमः इति निर्देशोऽस्ति । एतदतिरिक्तं गृहनिर्माणे नमो गह्वरेष्ठाय च इति पर्णशद्यायच इति च मन्त्रेणैतेन ज्ञायते यत् तत्समये एतादृशाः कलाकाराः आसन् ये पात्राणां कर्तने कृत्रिमपर्णनिर्माणे च दक्षाः आसन् ।

शिक्षायाः विभिन्न स्वरूपाणि यथा - राजनीतिशिक्षा, सैन्यशिक्षा, चिकित्साविज्ञानं, कृषिशिक्षा, यन्त्रनिर्माणशिक्षा भाषाविज्ञानशिक्षा पशुपालनशिक्षेत्यादयः राजनीतिशिक्षान्तर्गत-शासकसभासमितिसेनादीनामावश्यकतायाः प्रतिपादनं कुर्वन् वेदः कथयति - "तं सभा च समितिश्च सेना च"[१०] अर्थात् सुरक्षाव्यवस्थां सुदृढीकर्तुं सभाऽपि भवतु समितिरपि। राज्ञः प्रजानां च मध्ये सामञ्जस्यं स्थापयितुं त्रिप्रकारिकायाः सबायाः निर्मातुं निर्देशः वेदेषु प्राप्यते । यथा-

**"त्रीणि राजना विदधे पुरूणि परि विश्वानि भूषथः सदासि"**[११]

सभामेतां प्रथमसदनजनसामान्यानामावाश्य-कतठां शासनसमक्षे प्रस्तेतव्यम्। द्वितीयसदने सदावश्यकतां योजनानुसारं विधाय अनुमानितं व्ययं स्वीकृत्य तृतीयसदनसमक्षे प्रस्तुतव्यम्। तृतीयसदने अनुमानितव्ययानुसारं योजनाः सञ्चालयितव्यम्। शासने समानतायाः यानुशंसा सम्प्रति कलेऽस्ति वेदेऽपि तस्या दर्शनं भवति।

**"विभक्तार हवामहे वसोश्चित्रस्य राधसः सवितारं नृचक्षसम्"**[१२]

वेदस्य प्रस्तुते मन्त्रे कथितमस्ति यद् राष्ट्रे निवासयोग्य भूमेः वस्त्राणां धनाद्यैश्वर्याणां सर्वेभ्यः समरूपेण व्यवस्थां कर्तुं वयं प्रशंसां स्तुतिं च कुर्मः। राजनीतिशिक्षान्तर्गत शासनव्यवस्थायां विभिन्न-विभागेभ्यः योग्यजनानां नियुक्त्यर्थं स्पष्टं निर्देशं प्रप्नुमः।

अर्थात् ब्राह्मणोचितकर्मणे ब्राह्मणानां राज्यादीनां संरक्षणाय शासकीयगुणसम्पन्नक्षत्रियाणां, पदार्थानामायातनिर्यात कार्याय वैश्यानां, व्यवस्थार्थं प्रसिक्षितानां मनुष्याणां नियुक्तिः भवेत्। अपराधावरोधनाय केन्द्रो भवेत् येन पापवृत्तयः नपुंसकत्वमेतु।

**चिकित्साविचारः**

चिकित्साशास्त्राणां शिक्षाप्रदानं कुर्वन् आध्यात्मिकाधिभौतिकाधिदैविक इति नाम्ना त्रयाणां दुःखानां वर्णनमस्ति। वेदस्य "भुवः भक्तिः" या दुःखनारीका शक्तिरस्ति, सृष्टेः समस्तेषु पदार्थेषु विद्यते,

सूर्याग्निवायुजलेषु भे, जतत्वानां वर्णयन् वेदो वदति "सूर्य आत्मा जगतस्तस्थुषश्च"[१३] । तथा च "उद्यन्नादित्यः क्रिमीन् हन्तुः"[१४] अर्थात् उदय सूर्यस्य रश्मयः कृमीणां नाशकाः। ब्राह्ममुहूर्ते उत्थाय सूर्यार्घ्यदाता, नित्ययज्ञकर्ता सर्वदा स्वस्थः भवतीति अद्यापि मन्यन्ते। यजुर्वेदस्यास्मिन् मन्त्रे भेषजयज्ञानामुपयोगिता वर्णिताऽस्ति।

"देवा यज्ञमतन्वत भेषजं भिषजाविक्षनां वरुणं भिषजां पतिम्", "शमिता नो वनस्पतिः"[१५] एतयोः मन्त्रयोः वरुणे वनस्पतौ च भेषजतत्त्वानि सन्तीति कथ्यते। वेदेषु "सोमम्" औषधीनां राजतदेति कथयन्ति। यज्ञक्रियायां प्राणवायुना याज्ञिकाः एनं सारल्येन प्राप्नुवन्ति इति प्रस्तुतमन्त्रेण विदितो भवति । "यदत्र रिप्त स्थं रसिनः सुतस्य यदिन्द्रो अपिबच्छीभिः। अहं तदस्य मनसा शिवेन सोमं राजानमिह भक्षयामि"[१६] औषधीनां सेवनकालस्य सम्बन्धे यजुर्वेदे वर्णितोऽसति " या ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा । मनैनु ब्रभ्रूणामहं शतं धामानि सप्त च ॥"[१७]

अर्थात् या औषधिः जले च उत्पन्ना भवति तां त्रिवर्णानन्तरं उचितरूपेण पक्कं वैद्यकशास्त्रानुसारेण ग्रहणीयम्। एषौषधिः शरीरस्य सप्तोत्तरशतमर्मस्थानेषु प्रभावं करोति। अपक्कं न खादयितव्यम्। वेदेषु शङ्खमौषधीरिति कथयन् एतं अमत्याः नाशकः विकाराणां प्रशमकः इति कथिम् आसीत् ।

यथा - **शङ्कनामीवाममतिं शङ्खेनोत सदान्वाः।**
**शङ्खो नो विश्वभेषजाः कृशनः पात्वंहसः ।।**[१८]

एततिरिक्तं रुधिरस्त्रावनिवारणार्थं, हृदयरोगनिवारणार्थं, ज्वरनाश-नार्थं, विषमपाकर्तुमनिन्द्रामपाकर्तुमित्यादि-रोगाणां समूलनाशनार्थं मन्त्राः अथर्ववेदस्य पृथक् - पृथक् अध्यायेषु वर्णिताः सन्ति। शल्यचिकित्साया अपि सविस्तरेण वर्णनमथर्ववेदे प्राप्यते । एताः औषधीः उचितरूपेण ज्ञातव्यं रोगोपचारान्नपि इत्यपि वेदे निर्दिष्ठम् ।

**कृषि विचार:**

सर्वेभ्यः प्राणिभ्यः आहार अनिवार्य अस्ति। मनुष्याः कृषिकर्मणा एतस्य पूर्ति कुर्वन्त। पृथिव्याः अन्नफलादीनां खाद्यपदार्थानामुत्पत्ति-करणमेव कृषिकर्म। वेदेषु, कृषिविज्ञानस्योल्लेखं कुर्वन् वपनकार्यस्य आधारभूतायाः पृथिव्याः स्वरूपमपि वर्णितमस्ति। यथा - "भूट्टिमरावधनं महत्" अर्थात् अस्यां भूमौ पुरुषार्थस्य वपनं कुर्वन्तु। पृथिव्याः उत्पादनक्षमतायां वृद्धये यज्ञस्य प्रयोगः करणीयः यथा वेदमन्त्रः कथयति - "पृथिवी च मे यज्ञेन कल्पन्ताम्"[१९] "अन्नं साम्राज्यानामधिपतिः" अनेन मन्त्रेण अन्नस्य प्रधानतायां व्याख्यां कुर्वन् वेदः कथयति यत् श्रेष्ठान्नप्राप्तये धान्यानु उचितविधिना वपनीयानि ।

**"सं वपासि समाप औषधीभिः समोषधयो रसेन"**।[२०]

वपितकृषौ खनिजद्रव्याणां जलानामवश्यकतां कथयन् यजुर्वेदः कथयति। "सं रेवतीर्जगतीभिः पृछ्यन्तां सं मधुमतीर्मधुमतीभिः पृच्यन्ताम् " अर्थात् मधुरसेन युक्ताभिः ओषधिभिः द्रव्यैश्च सा कृषिः सम्पन्नो भवतु । दिककृषिः तदेव यस्यां पृथिव्यां घृतमधुदुग्धपेयजलैः सेच भवेत् ।

**"घृतेन सीता मधुना समज्यातां विश्वैर्देवैरनुमत मरुद्भिः ।**
**ऊर्जस्वतीः पयसा पिन्वमानाऽस्यान्त्यीते पयसाभ्यावव‍ृत्स्व।।"**

अपर्युक्ते मन्त्रे ऊर्जस्वतीः पयसा पिन्वमाना आदयः कृषियोग्य भूमेः विशेषणाः सन्ति। घृतादिपदार्थानां मिश्रणेन तेजस्वी मधुरं च भूट्टिमकणैः उत्तमकृषेः प्राप्तिर्भवति ।

वेदे कृषकाय " कीनाशः " इति पदं प्रयुक्तः । "कुत्सितं नाशयतीति कीनाक्तम्" अर्थात् यः दुर्भिक्षस्य दुर्दिनस्य च नाशं करोति। श्रेष्ठकृषेः कर्त्रे कीनाशाय यजुर्वेदे कथितमस्ति - "अन्नानां पतये नमः इरायै कीनाशम् " ।

**पशुपालन विचारः**

कृषिणा सवैव पशुपालनमपि वैदिककालीनपरम्परा आसीत्। यातायातस्य कार्यं, सन्देशवाहनं भारवाहनमित्यादीनां कार्याणां ततश्च पशुपक्षिणां दर्शने शुभाशुभविचारः पशुपालनस्य कारणमासीत् । वेदेऽपि पशुपालनस्य निर्देशः प्राप्यते यथा यजुर्वेदे[२१] कस्मिन् मन्त्रे कथितमासीत। "उपहूता इह गावऽपूहूताऽअजायः।" अर्थात् अस्माकं गृहेषु गावः अजाः आदयः पशवः भवन्तु, गवे वेदे अदन्या पदस्य प्रयोगं कृतमासीत् । अर्थात् सा अहिंसनीया इति। यजुर्वेदस्य चतुर्विंशेऽध्याये अनुमानतः द्विचत्वारिंशत् पशूनां त्रिसप्ततिश्च पक्षिणां विविधोपयोगविषये एवञ्च गुणधर्माणा-मुल्लेखोऽस्ति। "अश्वस्तूपरो गोमृगस्ते प्राजापत्याः"[२२] तदैव यजुर्वेद कथितमस्ति।

वसन्ताय कपिञ्जलानालभते, ग्रीष्माय कलविङ्कान् वर्षान्भिरि-तत्तिरीन्। शरदे वर्तिका हेमन्ताय करान् शिशिराय विककरान्।।[२३]

एवमेव शिशुमारलजलचरेण समुद्राभ्यन्तरस्य ज्ञानं मण्डूकैः मेघस्य ज्ञानं कर्तुं शक्यते अस्यैव प्रतपादयन् कथितमस्ति-

**"समुद्राय शिशुमारानालभते पर्जन्याय मण्डूकानद्यौ मत्स्यान्"**[२४]

वेदमन्त्राः कथयन्ति यत् विदस्य रात्रेः अहोरात्रस्य च सन्धिकाले के के पक्षिणः उपयुक्ता भवितुं शक्यन्ते यथा -

**"अह्ने पारावतानालभते रात्र्यै सीचापूरहोरात्रयोः।**
**सन्धिभ्यो जतूर्मासेभ्यो दात्यौहान्सवत्सराय महतः सुपर्णान्"**[२५]

अर्थात् दिवसे कपोताः, रात्रौ सीचापूः, अहोरात्रे जतूः, मासस्य ज्ञानाय कृष्णकाकः, संवत्सराय सुपर्णः आदीनां पक्षीणामुपयठोगं कर्तव्यम् । पशुपक्षिणां गुणधर्मं प्रतिपादयन् वेद कथयति - "सौरी बलाका"[२६] बलाका सूर्य इव गुणवती। "पृष्ट स्थूलपृषती ता मैत्रावरुण्यः"[२७] पृषती, अल्पपृषती, सम्पूर्णपृषती च मित्रावरुण-गुणयुक्ताः सन्ति।

**यन्त्रविज्ञानविचारः-**

वैदिकमन्त्रेषु वैज्ञानिकपद्धत्या यातायाताय प्रयोगं कर्तुं यन्त्रनिर्माणस्य शिक्षाया उल्लेखोऽपि लभ्यते। विमाननौ-

कान्तरिक्षयानरथविद्युद्रथवायुरथादीनां निमार्णस्य उपयोगस्य च विधेर्वर्णनं वेदेषु प्राप्यते । नैतदाश्चर्यं यत् आधुनिकविज्ञानस्यापि केषाञ्चनांशानां वर्णनं वेदे लभ्यते। "दिव्यं नभो गच्छ स्वाहा" इति मन्त्रे कथितमस्ति यद् दिव्याकाशे ये घृतीकस्य सूक्ष्मं सोमजलमयस्य परिधयाः स्थानानि च सन्ति ते दिव्ययानेन ज्ञायन्ते ।

**"वेदा यो वीनां पदमन्तरिक्षेण पततमाम्। वेद नावः समुद्रियः"**[२८]

इत्यस्मिन् मन्त्रे अन्तरिक्षयानस्य समुद्रयानस्य च सञ्चालन-निर्माणप्रक्रियाविषये ज्ञातुं निर्देशः दत्त अस्ति। विमानस्य गुणान् वर्णयन् यजुर्वेदः कथयति -

**"इमौ ते पक्षावजरौ पतन्त्रिणो याभ्यां रक्षां स्य पहं स्यग्ने"** (१९.५२)

अर्थात् ते विमानस्य ये पक्षाः सन्ति ते दृढाः सन्ति। एतेषु पतनशीलगुणाः सन्ति, यत्रेच्छन्ति तत्र अवतरितुं क्नुवन्ति । एते पक्षाः एतादृशाः सन्ति येषु मध्यस्य व्यवधानान् हे अग्ने त्वं नाशयसि।

अस्त्रविज्ञानविचारः-

यन्त्रविज्ञानस्य शिक्षया सह वेदमन्त्रेषु अस्त्राशिक्षायाः सैन्यशिक्षायाश्चापि वर्णनं दृष्टिगोचरो भवति। "नमः सेनाभ्यः सेनानिभ्यश्च वो नमः" इति यजुर्वेदस्य मन्त्रः सैन्यशिक्षायाः प्रमाणं स्थापयति । धनुः शरप्रयोगस्य च शिक्षायाः निर्देशः प्रस्तुते मन्त्रे प्राप्यते-

**प्रमुञ्च धन्वनख्वमुभयोरार्द्वियोर्ज्याम्।**
**याश्च ते हस्त इषवः परा ता भगवो वप।।**

अर्थात् हे सेनापते! तव हस्ते ये शराः सन्ति ते शत्रुषु प्रहाराय सन्ति। धनुषि पूर्वापरप्रत्यञ्चायामुपरि स्थापयित्वा शत्रुषु नलेन प्रक्षिपतु एवञ्च शत्रूणां बाणान् अपाकर। सेनानां प्रोत्साहनाय वाद्ययन्त्राणां प्रयोगः कर्तव्यः तदैव "नमो दुन्दुभ्याय चाहनन्याय च"[२९] मन्त्रस्योल्लेखः प्राप्यते। एतदतिरिक्त वेदमन्त्राः भूसेनानां, भूगर्भसेनानां मार्गणामेवञ्च अन्नरक्षकसेनानां वातविज्ञानयुक्तसेनानां वर्षणशीलद्युसेनानामित्यादीनां पृथक् स्थापयितुं निर्देशाः तन्मन्त्रेषु सन्ति।

**नमोऽस्तु रुद्रेभ्यो ये दिवि येषा वर्षमिषवः।**
**नमोऽस्तु रुद्रेभ्योऽन्तरिक्षे येषां वातऽइषवः।।**

एतेषु मन्त्रेषु वातविज्ञानपूर्णसेनानां घुसेनानां च सङ्केतः प्राप्यते। वेदेषु "आप्ता" इति नामकस्य एकस्य मन्त्रस्य नाम आयाति येन शत्रवः मूर्च्छतामुपयान्ति ।

रक्षासाधनानां कवचस्य महिमा - "मर्माणि ते वर्मणा छादयामि" मन्त्रे कथितमस्ति ? एतदतिरिक्तमश्वानां रथादीनां च युद्धसमयाय उपयोगमपि वेदस्य मन्त्रेषु प्राप्यते ।

उपर्युक्त विवरणेन ज्ञायते यद् वैदिक साहित्ये विभिन्न शिक्षाणां वर्णनं विस्तरेणाऽस्ति। यावत्यः शिक्षाः आधुनिकयुगे अभवन् तदपेक्षया अधिकविद्याः वेदमन्त्रेषु निहिताः सन्ति। अन्वेषणानन्तर-मध्ययनानन्तरमन्याः अपि विद्याः प्रकाशिताः भवितुं शक्यन्ते।

भारतीयसंस्कृतेर्मूलभूतः वेदः एव इति सर्वे स्वीकुर्वन्ति । अस्माकं सर्वे सिद्धान्ता वैदिकमन्त्रेषु धर्मशासत्रेषु चोपदिष्टाः।

**संगच्छध्वं संवदध्वं सं वो मनसि जानताम्।**
**देवा भागं यथापूर्वे संजानाना उपासते।।**[३०]

इत्यपि मन्त्रे सर्वजनेभ्यः समभावस्योपदेशोऽस्ति ।

**समानी व आकूतिः समाना हृदयानि वः।**
**समानमस्तु वो मनो यथाः वाः सुसहासति ।।**

इत्यस्मिन् मन्त्रे वर्णितमस्ति यद् युष्माकमध्यवसायाय हृदयमनांसि समानानि भवन्तु। साकमेव सर्वे निवसन्तु। एवञ्च वेदे व्यावहारिकतायापि स्थानं दत्तमस्ति । समाजे परस्परसहयोगेनैव निर्वाहः सम्भवति, एतस्याधारो वेदस्यास्यामृचि प्राप्यते -

**देहि मे ददामि ते नि मे धोहि हि ते दधे।**
**निहारं च हरासि मे निहारं निहराणि ते स्वाहा।।**

अर्थात् त्वं मह्यं देहि अहं तुभ्यं ददामि त्वं मदुत्तमगुणान् धारय अहं त्वद्धारयामिष सत्यनैतिकता सदाचारपुरुषार्थाणां संस्कृतिं वैदिक्यः ऋचः उद्घोषयन्ति । यतः असमाकं तात्पर्यं भवतु न वा वयं तां प्रति सद्भावनां पारयामः- "यठांश्च पश्यामि यांश्च न तेषु सुमतिं कृधि"[३१] इति मन्त्रेण सुविचाराणां संस्कृतेः प्रतिपादनं भवति । शतपथब्राह्मणे "सत्यमजेयमस्त्रम्" इति मन्त्रेण सुविचाराणां संस्कृतेः प्रतिपादनं भवति । शतपथब्राह्मणे "सत्यमजेयमस्त्रम्"[३२] इति कथयन् -

वेदानामस्याः ऋचः सिद्धान्तेन विश्वजनीनायाः सुस्थिरायाः संस्कृतेर्विकास अभूत्। सदा जाग्रदवस्थायां भूत्वा पुरुषार्थविधानस्य सिद्धान्तः "भूत्यै जागरणम्"[३३] इत्यतः प्राप्यते। यजुवेदस्य एकोनत्रिंशतेरध्यायस्य एकोनपञ्चाशत् मन्त्रः "श्मा भवतु नस्तनूः"। अस्माकं संस्कृतिः आशावादी अस्तीति सिध्यति। इयं वैदिकसंस्कृतिः अस्मात् उन्नतिशीलजीवनाय प्रेरयति। "तेन त्यक्तेन भुञ्जीथाः" इत्यनेन निरपेक्षस्य भावनस्य प्रतिपादिता संस्कृतिः वेदेभ्य एव प्राप्यते[३४] इति स्वस्तिवाचने इन्द्रसूर्यविष्णु बृहस्पतिभिः मानवमात्रस्य कल्याणस्य प्रार्थना विहिताऽस्ति ।

**"स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषाः विश्ववेदाः।**
**स्वस्ति नस्ताक्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु।।"**

एतादृश्यः ऋचः भारतीयसंस्कृतेः उदारोदात्तानां भावानां च प्रकाशनं कुर्वन्ति इति दृढं विश्वसनीयः ।

**आधार ग्रन्थाः**


ऋग्वेद भाष्य भूमिका, आर्ष साहित्य प्रचारट्रस्ट्. नवदेहली, २०१०

आश्वलायश्रौतसूत्रम्, संस्कृत कलाशाला, बनारस्, १९५५

मनुस्मृतिः, किशोर विद्यालयः, लक्नो, १९१७

भगवद्गीता, गीताप्रेस्, गोरखपूर, १९९२

तैत्तिरीय संहिता - सायन भाष्यम्, वैदिक संशोधन मण्डलम्, पूने, १९९०

निरुक्तम्, राजकीयगन्रन्थशाला, मुम्बई, १९१८

तैत्तिरीयब्राह्मणम्, सायनभाष्यम्, नागपब्लिस - देलही, २००३

छान्दोग्योपनिषत् - अवधूतदत्तपीठम्-मैसूरू, २०१५ ७.

वाल्मीकि रामायणम् - गीताप्रेस् - गोरखपूर, २०१०

शतपथब्राह्मणम् - सम्पूर्णानन्द संस्कृत विश्वविवद्यालयः, वारणासी, २००७

बृहदारण्यकोपनिषत् - गीताप्रेस गोरखपूर, २०१५

**पासू :-**

१. तै.सं. ४.१.८

२.पुरुषसूक्तम्, ऋवेदः १०.९०.१३

३. बृहदारण्यकोपनिषद् २.३.१

४. ऋग्वेदः १०.३९.१४

५. ऋवेदः १.१.४५

६. वाल्मीकिरामायणे ७ ९९.७

७. अथर्ववेद ९.३.१६

८. अथर्ववेद १.३.१

९. अथर्ववेद १.३.७

१०. अथर्ववेद १४.९.२

११. ऋग्वेदः ३.३४.६

१२. ऋग्वेदः ३.३८.६

१३. यजुर्वेदः ३.३८.६

१४. यजुर्वेदः ७.४२

१५. यजुर्वेदः २.३२.१

१६. यजुर्वेदः २१.४०

१७. यजुर्वेदः १९.३५

१८. यजुर्वेदः १२.६५

१९. अथर्ववेदः ४.१०.३

२०. यजुर्वेदः १८.२२

२१. यजुर्वेदः १.२१

२२. यजुर्वेदः ३.४५

२३. यजुर्वेदः २४.२

२४. यजुर्वेदः २४.२०

२५. यजुर्वेदः २४.२१

२६. यजुर्वेदः २४.२५

२७. यजुर्वेदः २४.३३

२८. यजुर्वेदः २४.२

२९. ऋग्वेदः १.१२५.७

३०.यजुर्वेदः १६.३५

३१. ऋग्वेदः १०.९१.२

३२. अथर्ववेदः १७.१.७

३३. शत.ब्रा. ३.४.२.८

३४. यजुर्वेदः ३०.१७

३५. सामवेदः २१.१.९